## अतो दीर्घो यञि। (१०१/२१७०)

अकारान्तस्य अङ्गस्य दीर्घो भवति यञादौ सार्वधातुके परतः। पचामि, पचावः, पचामः। पक्ष्यामि, पक्ष्यावः, पक्ष्यामः। अतः इति किम्? चिनुवः। चिनुमः। यञि इति किम्? पचतः। पचथः। सार्वधातुक इत्येव, अङ्गना। केशवः। केचिदत्र तिङि इत्यनुवर्तयन्ति, तेषां [1]भववान् इति क्वसौ [2]सार्वधातुकदीर्घो न भवति॥

## सुपि च। (१०२/२०२)

'अतो दीर्घो यञि' (७.३.१०१/२१७०) इत्यनुवर्तते। सुपि च यञादौ परतोऽकारान्तस्याङ्गस्य दीर्घो भवति। वृक्षाय। प्लक्षाय। वृक्षाभ्याम्। प्लक्षाभ्याम्। अतः इत्येव, अग्निभ्याम्[3]। यञि इत्येव, वृक्षस्य। प्लक्षस्य॥

## बहुवचने झल्येत्। (१०३/२०८)

[4]बहुवचने झलादौ सुपि परतोऽकारान्तस्याङ्गस्य एकारादेशो भवति। वृक्षेभ्यः। प्लक्षेभ्यः। वृक्षेषु। प्लक्षेषु। बहुवचने इति किम्? वृक्षाभ्याम्। प्लक्षाभ्याम्। झलि इति किम्? वृक्षाणाम्। सुपि इत्येव, यजध्वम्। [5]पचध्वम्[6]॥

## ओसि च। (१०४/२०७)

ओसि परतोऽकारान्तस्याङ्गस्य एकारादेशो भवति। वृक्षयोः स्वम्। प्लक्षयोः [7]स्वम्। वृक्षयोर्निधेहि। प्लक्षयोर्निधेहि[8]॥

## आङि चापः। (१०५/२८९)

आङ इति पूर्वाचार्यनिर्देशेन तृतीयैकवचनं गृह्यते। तस्मिन्नाङि परतः, चकाराद् ओसि च, आबन्ताङ्गस्य एकारादेशो भवति। खट्वया। मालया। खट्वयोः। मालयोः। बहुराजया। कारीषगन्ध्यया। बहुराजयोः। कारीषगन्ध्ययोः। आपः इति पितो ग्रहणं किम्? कीलालपा[9] ब्राह्मणेन। कीलालपोः ब्राह्मणकुलयोः। ङ्याब्ग्रहणेऽदीर्घग्रहणम् इति वचनात् इह न भवति, अतिखट्वेन [10]ब्राह्मणकुलेन॥

## सम्बुद्धौ च। (१०६/२८८)

आपः इति वर्तते। सम्बुद्धौ च परतः [11]आबन्तस्य अङ्गस्य एत्वं भवति। हे खट्वे। हे बहुराजे। हे कारीषगन्ध्ये॥

---

1. प्रभववान् ह. 2. सार्वधातुके क, सार्वधातुकदीर्घेण न भवितव्यम् ह. 3. वायुभ्याम् इत्यधिकम् ब. ह. 4. सुपि इति वर्तते इत्यधिकम् क. ह. 5. विजयध्वम् इ. 6. अत इत्येव, खट्वाभ्यः इत्यधिकम् इ. 7. स्वम् नास्ति क. 8. अत इत्येव, वाय्वोः इत्यधिकम् इ. 9. ब्राह्मणकुलेन ब. 10. ब्राह्मणेन इति इ. 11. आपः एकारादेशो भवति इ.